జనదేవ వ్యుక్తిత్రుహిం పంలు వింశకదపత్రు ౧౦

గ్రం. థసం. ఖ్య ౧౫౦

॥१॥ श्रीगणेशायनमः॥ तस्मात्सकृद्दर्शनगम्या इति मूलग्रन्थः। तदुपरी जगदीशतर्क
लङ्कारिमध्यपि व्याप्तेः। सकृद्दर्शनगम्यत्वप्रतिज्ञायां व्याप्तित्वस्यैकस्याभावाद्व्या
पकसामानाधिकरण्यरूपव्याप्तित्वेन पक्षत्वे बाधः परैरर्पितस्याः सकृद्दर्शन
गम्यत्वानभ्युपगमात्। निरूपाधिसाध्यसंबंधरूपव्याप्तित्वेन पक्षत्वे तु न्या
यमतव्युदासः॥ तस्याः सकृद्दर्शनगम्यत्वसिद्धावपि तन्मतेऽनुमित्युपयुक्ता
याः व्यापकसामानाधिकरण्यरूपाया व्याप्तेः सकृद्दर्शनगम्यत्वसम्भवात्॥ तथापि ज्ञान
विषयतया अनुमितिजनकतावच्छेदकतावच्छेदकतापर्याप्त्यधिकरणत्वेन उभ
यव्याप्तिस्तद्धारणधर्मेण पक्षत्वमिति व्याख्यातौ॥ तच्चेपमनुपपत्तिः॥ ननु अनु
मितिजनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन पक्षत्वं कथं सङ्गच्छते॥ यतोऽनु
मितिं प्रति नैयायिकमते व्यापकसामानाधिकरण्यरूपव्याप्तिज्ञानत्वेन मीमां राम
सकमते निरूपाधित्वसाध्यसम्बन्धरूपव्याप्तिज्ञानत्वेन हेतुत्वं॥ तथाचानुमि ॥२॥

ति जनकतावच्छेदकतापर्याप्त्यधिकरणत्वं तत्तन्मते तादृशतादृशज्ञानत्वस्यैवे
ति॥ नव्यापकसामानाधिकरण्यरूपनैयायिकमतेसिद्धव्याप्तेर्निरुपाधिसा
ध्यसंबंधरूपमिमांसकमतसिद्धव्याप्तेर्वर्तते॥ नच विषयितासंबंधेनव्या
प्तिविशिष्टज्ञानत्वेनानुमितित्वं प्रति हेतुतया तादृशजनकतानिरूपितविषयि
तासंबंधावच्छिन्नावच्छेदकत्वपर्याप्त्यधिकरणत्वव्याप्यत्वादावक्षतमिति वा
च्यं प्रमेयत्वेन व्याप्यवगाहिज्ञानस्य विषयितासंबंधेनव्याप्तिविशिष्टतया ततः
नुमित्यापत्तेः॥ नविषयितासंबंधेन व्याप्तित्वावच्छिन्नविशिष्टज्ञानत्वेनानुमि ना
ति प्रति हेतुतया प्रमेयत्वेन व्याप्यवगाहिज्ञानान्नानुमित्यापत्तिर्व्याप्ति
ज्ञानत्वेन व्याप्यवगाहिज्ञानस्यैव विषयितासंबंधेन व्याप्तित्वावच्छिन्नविशि
ष्टत्वादिति वाच्यं॥ धूमत्वेन धूलीपटलावगाहि वह्नित्वेन गुंजावगाहि धू
मव्यापकत्वसमानाधिकरणो धूमयियाकारकभ्रमात्मकव्याप्तिज्ञानादनु

।।२।। मित्यनुद्धयापत्तेः तादृशज्ञाने वास्तवव्याप्तित्वावच्छिन्नस्याविषयिता संबंधेना
सत्वात्। यद्विचधूमत्वावच्छिन्नविषयतानिरूपिताधिकरणत्वावच्छिन्नविषयता
निरूपिताधेयतात्वावच्छिन्नविषयतानिरूपितंभावत्वावच्छिन्नविषयता
निरूपिप्रतियोगित्वविषयतानिरूपितच्छेदकत्वविषयतानिरूपिताभाववि
षयतानिरूपितसाध्यतावच्छेदकविषयतानिरूपितावच्छिन्नविषयतानि
रूपिताधिकरणविषयतानिरूपितवृत्तित्वविषयतानिरूपितधूमविषयता
शालिज्ञाने भ्रमप्रमासाधारणरूपेणानुमितिप्रतिहेतुत्वमनुमते तदा तादृशप
रापरूपलक्षणत्वावगाहित्वस्यैवानुमितिजनकतावच्छेदकत्वात् व्याप्तेरनुमि
तिजनकतावच्छेदकत्वे बाधितमेव किंच आहार्यकत साध्यतद्धेतुकानुमितिप्र शिवः
तिनिरूपक्रमेण हेतुविषयतापर्याप्तनिवेश्यत्वनिरूपितपक्षतावच्छे ।।२।।

दकावच्छिन्नविषयताशालिनिश्चयत्वेनैव परामर्शविशेषे हेतुत्वं वाच्यं॥ अन्यथाऽत्र मानसिकप
रामर्शादनुमित्यनुत्पत्तेः॥ तथा च व्याप्तिज्ञानविरहदशायां तादृशपरामर्शविरहा
देवानुमित्युत्पादासम्भवात्॥ तद्धेतुकतत्साध्यकानुमितिनिरुक्तपरंपरनिरूप्यनि
रूपकभावापन्नतद्धेतुविषयताशालिज्ञानत्वेन हेतुत्वान्तरमप्रामाणिकमेव॥
नच्चैवं व्याप्तिज्ञानस्य कारणत्वानुपपत्तिरिति वाच्यं॥ अनुमितिसामान्यप्रति अभाव
ज्ञानत्वेन हेतुत्वंकल्पद्वयसैव तत्सम्भवात्॥ एतेन तत्साध्यकतद्धेतुकानुमितिप्रति
निरुक्तपरंपरनिरूप्यनिरूपकभावापन्नहेतुविषयताशालिज्ञानत्वेन हेतुत्वस्वे
पि अनुमितिजनकतावच्छेदकीभूतायाहेतुविषयतानिरूपितविषयतात्वस्य पर्याप्त
धिकरणत्वेन व्याप्तेः॥ प्रसक्तत्वं सम्भवी सति परास्तं॥ तादृशहेतुत्वे मानाभावा एव
दिति चेन्न मते॥ ॥अनुमितिजनकतावच्छेदकीभूताया यत्किञ्चिद्धर्मावच्छि
न्नविषयतानिरूपितभ्रमान्यज्ञानीयविषयतात्वपर्याप्त्यधिकरणत्वेनैव प्रसक्तत्वं॥

॥३॥ तथा च धूमव्यापकवह्निसमानाधिकरणधूमत्वावच्छिन्नविषयता तस्या अपि परंपरानि
रूप्यनिरूपकभावापन्नविषयतात्वेन जनकतावच्छेदकतया तादृशविषयताधिकर
णत्वस्य धूमव्यापकवह्निसमानाधिकरणधूमसत्त्वात्तत्र च सत्तद्दर्शने नैयायिकैः स्वी
कारान्न सिद्धसाधनं॥ मीमांसकमते च वह्निसमानाधिकरणधूमवानिति ज्ञानस्यैव
उपस्थि प्रथमतः [illegible]ऽनुमितिजनकत्वात् वह्निसामानाधिकरण्यविशिष्टधूमविषयतेन
निरूपकत्वसंबंधेन तादृशानुमितिजनकतावच्छेदकान्यरूपसंबंधेन तादृशोपस्थि
[illegible] धूम इति [illegible] सत्तद्दर्शनेन गम्यत्वस्य सत्त्वान्न बाधः
[illegible] वगाहिप्रमात्मकज्ञानादनुमितिस्त
त्रस्यावच्छिन्नहेतुविषयतानिरूपितपक्षतापक्षतावच्छेदकावच्छिन्नविषयतानिरू
पकत्वसंबंधेन व्याप्तिविशिष्टज्ञानत्वेन परामर्शस्य हेतुना सम्भवति॥ तत्रैवानुमिति शिवः
जनकतावच्छेदकतापर्याप्त्यधिकरणत्वेन व्याप्तेः॥ पक्षत्वं सुघटं तत्र सत्तद्दर्शि ॥३॥

नगम्यत्वसाधनेनैव मिमांसकाभिमतसिद्धिरिति प्राचीनमतानुसारिनवीनः
पन्थाः ॥ अत एवेति साध्यसाधनसंबंधेविशिष्टद्रव्यत्वमित्याकारके साध्यसाध
नसंबंधग्रहजनकतया तदतिरिक्तसापेक्ष्यग्राहकपदाद्यन्यत्वस्य तादृशवि
शिष्टद्रव्यत्वे सत्वेन तत्र साध्यसाधनसंबंधग्रहत्वव्यापकविषयिताकत्वविरहेण
व्यभिचार इति जगदीशाभिप्रायः ॥ ननु कथंमिदमुक्तं संगच्छते ॥ साध्यसाधनसं
बंधग्राहकातिरिक्तसापेक्षग्राहकान्यत्वविशेषवृत्तिधर्मस्य विविशितानुयोगि
कोभावानभ्युपगमादिति चेन्न मिमांसकमते अनुमिति जनकतावच्छेदकतापर्याप्त
ना धिकरणत्वेन साध्यसाधनसामानाधिकरण्यविशिष्टसाधनस्य पक्षतया तत्र साध्य
साधकसंबंधग्राहकातिरिक्तसापेक्षाया धूम इत्याकारकग्रहे स्तद्विषयत्वस्य धू
मे सत्वेन पूर्वरीत्या तद्द्रव्यत्वस्य विशिष्टधूमे विरहात्स्य रूपसिद्ध्यापत्तेः ततः साध्य
साधनसंबंधग्राहकातिरिक्तसापेक्षग्राहकान्यत्वमित्यनेन साध्यसाधनसंबंध॥

॥४॥ हकातिरिक्तसापेक्षग्रहविषयापर्याप्तविषयतावत्त्वमेव हेतुत्वेन विवक्षितं।
एवंसति साध्यसाधनसम्बंधग्राहकातिरिक्तसापेक्ष्य धूमइत्याकारकग्रहविषया
पर्याप्तियोवन्हिधूमसामानाधिकरण्यविशिष्टधूमइतिज्ञानीयविशिष्टधूमनि
ष्ठविषयता तस्याः पक्षे सत्वान्न स्वरूपासिद्धिः॥ तथाचैवं क्रमेण साध्यसा
धनसामानाधिकरण्यविशिष्टद्रव्यत्वस्य तादृशसाध्यसाधनसंबंधग्राहका
तिरिक्तसापेक्षग्रहकाव्यभावत्वेन व्यभिचारः सुस्थिर एव॥ नव्यास्तु वन्हित्व
जातित्वप्रकारेण वन्हिज्ञानादेः साध्यतास्थले वन्हित्वत्वावच्छिन्नधर्मिकतादृ
शावच्छेदकत्वनिश्चयत्वेन वन्हित्वत्वावच्छिन्नधर्मिकतादृशावच्छेदकत्वग्रहं
प्रतिविरोधित्वेपि दंडत्वदंडत्वावच्छिन्नसाध्यतास्थले निरवच्छिन्नविशेष्य शिवः
तावच्छेदकतासंबंधेन तत्पुरुषीयानवच्छेदकत्वज्ञानसामान्यं प्रतिबन्धकरूप
तादंडत्वदंडत्वादिप्रसेकधर्मावच्छिन्नविशेष्यताकतादृशावच्छेदकत्वस्य ॥४॥

कादकनिश्चये विशेष्यतावच्छेदकतासंबंधेन तत्पुरुषीयावच्छेदकत्वज्ञानत्वेन तत्पु
रुषीयज्ञानत्वमात्रेणैव वा प्रतिबंधकत्वं तादृशसंबंधेन तदवच्छिन्नाभावकूट
स्यैव हेतुत्वं ॥ अन्यथा दं३त्वदं३त्वाद्यवच्छिन्नतद्धर्मितावच्छेदकतान्तर्भावेन प्र
तिबंध्यतावच्छेदककोटौ गौरवापत्तेः ॥ नचैवं तादृशसंबंधेन तदवच्छिन्नाभा
वकूटस्यैव हेतुत्वमपेक्ष्यताम् एवान्निरवच्छिन्नविशेष्यतावच्छेदकत्वप्रका
शको तत्पुरुषीयतादृशानवच्छेदकत्वग्रहं प्रति निरवच्छिन्नविशेष्यतावच्छेदक
त्वप्रकाशकस्यैव तत्पुरुषीयतादृशावच्छेदकत्वग्रहस्य प्रतिबंधकत्वमुचितं ॥ धक
दं३त्वदं३त्वाद्यवच्छिन्नविशेष्यताप्रवेशगौरवादिति वाच्यं ॥ तथासति
दं३त्वसामानाधिकरण्यानवच्छेदकत्वनिश्चयेपि तत्सामानाधिकरण्याना
वच्छेदकत्वग्रहस्यानुत्पत्तिप्रसंगादिति[illegible] जगदीशः ॥ तथाच दं३त्वदं३त्वा

धवच्छिन्नविशेष्यताप्रवेशे तु तस्य हेतुत्वव्यापकतादृशावच्छेदकत्वप्रतियोगित्व
॥५॥ स्वरूपसंबंधावच्छिन्नावच्छेदकतानिरूपितविशेष्यतावच्छेदकता
संबंधेन तत्तद्रूपीयज्ञाननाशे एव प्रतिकत्वार्थाकत्वेन हेतुत्वसामानाधिक
रण्येनावच्छेदकत्वसामानाधिकरण्ययोः किंचित् हेतुनिष्ठतादृशावच्छेदकत्वस्य
हेतुत्वव्यापकभावेन निरूपितसंबंधेन तादृशे प्रतिबंधमिति भावः॥ नच
प्रतिबंध्यताघटकसंबंधे निरवच्छिन्नविशेषणं व्यर्थमिति वाच्यं॥ जाति
मान्हेतुसामानाधिकरण्याभावप्रतियोगितानवच्छेदकत्वसाकारकग्रहं प्रति हेतोर्हे
तुसमानाधिकरण्याभावप्रतियोगितावच्छेदकमित्याकारकग्रहस्य निरुक्त
संबंधेन प्रतिबंधकतापत्तेरतो निरवच्छिन्नत्वविशेषणमवश्यमिति भा
वः॥ नच तथापि हेतुत्वसामानाधिकरण्यप्रतियोगितावच्छेदकमित्याका

रकग्रहेपि ह्रदो हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकः ह्रद
त्वप्रमेयं ह्रसाकारकग्रहो निरवच्छिन्न विशेष्यतावच्छेदकतासंबंधेन ह्रद
त्वेपपन्नः स्यान्निरूक्त प्रतिबंधकताघटकसंबंधेन ह्रदत्वे तादृशावच्छे
दकत्वज्ञानरूपप्रतिबंधकसत्वादिति वाच्यं।। तादृशानवच्छेदकत्वप्रका
रता विशेष्यतावच्छेदकतासंबंधेन तस्यैव प्रतिबंध्यताघटकत्वाद्दोषः।।
तथाच तादृशप्रकारतानिरूपित विशेष्यतावच्छेदकतासंबंधेन निरूक्त
समूहालम्बनात्मकानवच्छेदकत्वग्रहो ह्रदत्वेन जायते किन्तु ह्रदत्वे तत्र प्रति
बंधकासत्वान्नानुपपत्तिः।। नचोक्तप्रतिबंधकताघटकसंबंधेन निश्च
यपदं वैयर्थ्यमिति वाच्यं। ह्रदो हेतुसमानाधिकरणाभावप्रतियोगितावच्छे
दकोनवेति संशयोत्तरं शब्दाद्धि ह्रदो हेतुसमानाधिकरणाभावप्रति

॥ द्वि ॥ तानवच्छेदकहेत्वाकारकग्रहानुपपत्तिरतो निश्चयपदं देयं॥ न च हेतौ हेतुसमा
नाधिकरणाभावप्रतियोगितावच्छेदकः हेतुश्च प्रमेयं हेत्वाकारकसमूहालम्बन
ग्रहोत्तरं हेतौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमित्याकारकग्रहो
न जायतां हेतोरपि हेतुत्वव्यापकतावच्छेदकत्वप्रतियोगिकस्वरूपसंबंधावच्छि
न्नावच्छेदकत्वनिश्चयनिरूपितविशेष्यतावच्छेदकतासंबंधेन तादृशग्रहा
मेकप्रतिबंधकत्वसत्वादिति वाच्यं॥ हेतुत्वव्यापकतावच्छेदकत्वप्रतियो
गिकस्वरूपसंबंधावच्छिन्नावच्छेदकत्वप्रकारतानिरूपितविशेष्यताव
च्छेदकतासंबंधेन तादृशग्रहस्य प्रतिबंधकत्वात्॥ तथा च तादृशप्रकारता
निरूपितविशेष्यतावच्छेदकतासंबंधेन तादृशावच्छेदकत्वग्रहो हेतुत्वेन श्री:
हेतुत्व जायते किन्तु हेतुत्वेनैव ततः धर्मिकानवच्छेदकत्वग्रहप्रति तादृशग्रहस्य न प्र ॥ द्वि ॥
तिबंधकत्वमिति॥ ॥ तथा च हेतुसमानाधिकरणाभावप्रतियोगित

नवच्छेदकत्वप्रकारतानिरूपितनिरवच्छिन्नविशेष्यतावच्छेदकतासंबंधे
नतद्रूपीयज्ञानप्रतिताद्दशानवच्छेदकत्वग्रहे प्रसेववाद् ऽत्वव्यापकाव
च्छेदकत्वप्रतियोगिकस्वरूपसंबंधावच्छिन्नावच्छेदकत्वप्रकारताव्यव
कारता निरूपितविशेष्यतावच्छेदकतासंबंधेन तद्रूपीयज्ञानत्वेन ताद
शावच्छेदकत्वज्ञानत्वेनैव वा प्रतिबंधकत्वमिति फलितं ।। अत्रेयमापत्तिः ।।
ननु दंडत्वावच्छिन्नस्य प्रतिबध्यहिताप्यनिवेशेपि दंडत्व~~व्यापकत्वविशिष्ट~~
समानाधिकरण्येन ताद्दशावच्छेदकत्वनिश्चयोत्तरं दंडत्वसामानाधिकर
ण्येन ताद्दशावच्छेदकत्वनिश्चयोपपादनापि दंडत्वव्यापकत्वविशिष्टवच्छे
दकत्वप्रतियोगिकस्वरूपसंबंधावच्छिन्नावच्छेदकत्वप्रकारतान्यप्रकार
तानिरूपितविशेष्यतावच्छेदकतासंबंधेन ज्ञानस्य प्रतिबंधकत्वात् ।।
अत्र च प्रतिबध्यीभूतज्ञाने प्रतिबंधकीभूतज्ञानेपि तद्रूपीयत्वनिवेशन

।।७।। मातृस्यकं ।। अन्यथा एकपुरुषीयतादृशावच्छेदकत्वनिश्चयेपि अन्यपुरुषीयतादृशाव-
च्छेदकत्वबुद्ध्यनुदयप्रसङ्गात् ।। एवञ्च निरूपकसंबन्धेन संसारयावत्पुरुषाः प्रत्ये-
कतत्पुरुषीयज्ञानत्वेनैव प्रतिबंधकत्वं वाच्यं ।। तथा च इदंत्वावच्छिन्नत्वस्य यावत्पु-
रुषभेदेन प्रतिबंधकत्वकल्पनमपेक्ष्य लाघवात् प्रतिबध्यादिविशेषावच्छिन्नविशेष्य-
कसमवायेनैक प्रतिबंधकत्वकल्पनमयोचितं ।। एवं इदंत्वावच्छिन्नस्य तयावत्पुरु-
षभेदेन प्रतिबंधकत्वमपेक्ष्य लाघवेन समवायेनैकत्व प्रतिबंधकत्वकल्पनमुचि- प्रे
तं तत्कथं जगदीशोक्तं संगच्छते तस्मादिदं सिद्धान्तितं ।। अधिकरणविषयता नि-
रूपितवृत्तित्व विषयतानिरूपिताभाव विषयतानिरूपितप्रतियोगित्व विषयतानि-
रूपिताभाव विषयतानिरूपितावच्छेदकत्व विषयतानिरूपितप्रतियोगिकत्व
विषयतानिरूपितसंसर्गता विषयतानिरूपितहेतुसमानाधिकरणाभाव प्रति-
योगितावच्छेदकत्व प्रकारत्वान्यप्रकारतानिरूपितविषयतावच्छेदकतासंबन्धेन शिवः
तत्पुरुषीयज्ञानत्वेनैव प्रतिबंधकत्वकल्पनीयं ।। एवं सति इदंत्वसामानाधिकर- ।।७।।

ण्यतादृशावच्छेदकत्वग्रहे दंडत्वसामानाधिकरण्यव्यवच्छेदकत्वधीः ॥ तथाच धर्मि
तावच्छेदकानन्तर्भावेन एकधर्मितावच्छेदकस्थले यावत्स्वरूपनिवेशकृत [illegible]
गौरवानवतार इति स्थितं ॥ पक्षास्वीयहेतुसमानाधिकरणाभावप्रतियोगिताव
च्छेदकत्वप्रकारकविशिष्टतादृशावच्छेदकतासंबंधेन ज्ञानत्वस्वरूपीय ज्ञानत्वेनैव
प्रतिबंधकत्वं कल्पनीयं ॥ प्रकारतावैशिष्ट्यञ्च स्वभिन्नप्रकारतानिरूपितविशे
ष्यतानिरूपकत्व स्वनिरूपितसंसर्गतानिरूपितप्रतियोगित्वविषयतानिरूपिता
वच्छेदकत्वविषयतानिरूपिताभावविषयतानिरूपितप्रतियोगित्वविषयतानिरू
पिताभावविषयतानिरूपितवृत्तित्वविषयतानिरूपिताधिकरणविषयतानिरूपि
तनिरवच्छिन्नविषयताश्रयवृत्तित्वोभयसंबंधेन ॥ ॥ स्वपक्षहेतुसमानाधि
करणाभावप्रतियोगितावच्छेदकत्वप्रकारतापरं ॥ तथाच उभयद्वित्वेपि धर्मि
तावच्छेदकानन्तर्भावेनैवैकरूपेणउक्तप्रकारप्रतिबंधकत्वस्य दंडत्वदंडत्वाभ्या

॥८॥ वक्ष्यमाणतयोरेवमिति भावः॥ ननु तथापीदं हेतुसमानाधिकरणाभावप्रतियो
गितावच्छेदकः इदं च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकमिति समु
हालम्बनज्ञानानन्तरं इदं ज्ञानं इदं प्रमेयमज्ञानं तदुत्तरं इदं हेतुसमानाधिक
रणाभावप्रतियोगितावच्छेदकं इत्याकारकबुद्ध्यनुरोधेन सामान्यप्रतिबन्ध
कीभूतज्ञाने एतदप्रामाण्यज्ञानाभाववैशिष्ट्यं निवेशनीयं॥ एवं सति तादृशज्ञा
नाभाववैशिष्ट्यहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वज्ञानस्य निरूपक
संबन्धेन इदं स्वं इदं स्वसहितं इदं स्वनिरवच्छिन्नविशेष्यतावच्छेदकतासं
बन्धेन इदं स्वेप्यनवच्छेदकत्वबुद्ध्यापत्तेः॥ मैवं इदं ज्ञानं इदं रागमप्रकारकाप्रा स
ण्यज्ञानश्च एतज्ज्ञानधर्मिकहेतुसमानाधिकरणाभावप्रतियोगितावच्छेद
कत्वाभाववदिदंनिष्ठविशेष्यतानिरूपितहेतुसमानाधिकरणाभावप्रतियोगि शिवः
तावच्छेदकत्वनिष्ठप्रकारतानिरूपकत्वप्रकारकं॥ एवं च सामानाधिकरण्य ॥८॥

संबंधेन एतादृशज्ञानाभावविशिष्टनिरूक्तोभयसंबंधावच्छिन्नतादृशप्रकारता
विशिष्टविशेष्यतावच्छेदकतासंबंधेन तादृशावच्छेदकत्वज्ञानं विरोधि ॥ ताद
शाभावश्च स्वनिरूपितएतज्ज्ञानत्वावच्छिन्नविशेष्यतानिरूपितरूपकत्वनि
ष्ठप्रकारतानिरूपिततादृशावच्छेदकत्वनिष्ठप्रकारतानिष्ठप्रकारतानिरूपित
निरूतत्वनिष्ठविषयतानिरूपितविशेष्यतानिष्ठविषयतानिरूपितनिष्ठत्व
विषयतानिरूपिततादृशावच्छेदकत्वाभावावच्छिन्नविषयतानिरूपिता॥नि
रवच्छिन्नावच्छेदकतासंबंधावच्छिन्नप्रतियोगिताकः ॥ तथा च एतादृशसंबंधे
तादृशप्रामाण्यज्ञानश्च दंडत्वेऽस्त्वेव न तु दंडत्वे अतस्तादृशसंबंधावच्छिन्न
प्रतियोगिताकतादृशप्रामाण्यज्ञानाभावस्य दंडत्वे सत्वान्नत्वेन वच्छेदकत्वेरि धी
तिध्येय ॥ योग्यनुपलब्धिविरहेण हेतुमन्निष्ठाभावप्रतियोगितावच्छेदक
त्वसामान्याभावघटितव्याप्तेर्लौकिकप्रत्यक्षागम्यत्वमुपपद्यते धीरूताकथ
श्चिद्विरोधादिसकलकारणवशाद्धूमत्वादौ गृहीतो धूमवह्निप्राभावप्रतियो

॥ ९ ॥ गितावच्छेदकत्वाभावो वह्नित्वादावुपनयमर्यादयाभासत इत्यग्रिमेनालौकिकप्रत्यक्षा
गम्यत्वमुपपादितं ॥ कथंचिच्छाब्दादिना विरोधादिति ॥ धूमत्वादौ तादृशावच्छेदकत्वस्य
विरोधग्रहदशायामित्यर्थः ॥ विरोधो ऽसामानाधिकरण्यम् आदिपदाच्च तादृशावच्छे
दकत्वव्यापकीभूताभावप्रतियोगित्वस्य परिग्रहः ॥ तादृशावच्छेदकत्वासामानाधिक
रणतया तादृशावच्छेदकत्वव्यापकीभूताभावप्रतियोगितया वा धूमे तत्त्वस्य धूमत्वा
स दौ परामर्शे ह्येव तादृशावच्छेदकत्वाभाव इति साध्यविशेष्यकाधेयत्वसंबंधेन धूमत्व
विशेषणकव्यतिरेक्यनुमित्यनन्तरमेव वह्नित्वं तादृशाभावप्रतियोगितानवच्छेदक
मित्याकारकलौकिकप्रत्यक्षमिति भावः ॥ नचैवमुक्तक्रमेण वह्नित्वादिहेतुता
वह्नित्वेपि व्यतिरेक्यनुमितिसम्भवात् धूमः सत्तानुपर्यन्तानुसारेण व्यर्थमिति वा
च्यं ॥ प्रसक्तस्तत एव प्रथमतः साध्यतावच्छेदकवह्नित्वादौ तादृशावच्छेदकत्वा शिवः
भावग्रहार्थं तदनुसरणादिति जगदीशव्याख्या ॥ अमेयमापत्तिः तथाहि तत्त्व ॥ ९ ॥
दृत्वाभावप्रतियोगितामादाय दोषवारणार्थं वह्नित्वादौ धूमव्यापकतावच्छेद

कत्वं वह्नित्वतद्धितरउभयानवच्छिन्नप्रतियोगित्वघटितं वाच्यं ॥ तथासतितद्व्य
तद्धूमाभावप्रतियोगितामादाय धूमत्वेऽप्रसिद्धेः ॥ एवं धूमत्वग्रहीतं यद्धूमत्वतद्धितरो
भयानवच्छिन्नप्रतियोगित्वघटितं धूमव्यापकतावच्छेदकत्वं तदर्पितत्वद्धूमाभावमा
दाय वह्नित्वधूमत्वयोर्व्यापकतावच्छेदकत्वस्य भिन्नतया कथं धूमत्वादिग्रहीतस्य धू
मत्वतद्धितरोभयानवच्छिन्नप्रतियोगिताकाभावप्रतियोगितावच्छेदकत्वाभावस्य
वे वह्नित्वेऽपनयनमर्थ्यादृह्याभानं ॥ अत्रेदं प्राचीनसमाधानं ॥ एकसाध्यतावच्छेदकस्थले उभ
यानवच्छिन्नप्रतियोगितामात्रं व्यापकतावच्छेदकत्वघटकं वाच्यं ॥ ननु वह्नित्वतद्धितोभ
यावच्छिन्नं प्रतियोगित्वं तत ॥ एवं सति विशिष्टधूमत्वेऽभावमादाय दोषसम्भवेन धूमत्वव
ह्नित्वयोरकव्यापकतावच्छेदकत्वसम्भवान्न कोपि दोषः ॥ न चाच्चकल्पे मज्जनसीयं वह्निमा
न्धूमादित्यादेव मज्जनसीय वह्न्यभावप्रतियोगिताया उभयावच्छिन्नत्वादेवतादृशप्रति
योगिताया लक्षणाघटकत्वादिति व्याप्तिरिति वाच्यं ॥ एकसाध्यतावच्छेदकस्थले साध्य

॥१०॥ तायासुभयानवच्छिन्नत्वनिवेशाद्वा कातिव्याप्तिवारणसम्भवादन्य, सर्वएवं प्रकार
तानुसन्धेयं ॥ नव्यास्तु स्वनिरूपकत्वस्वभिन्नयत्साध्यतावच्छेदकतापर्याप्त्यनुयोगि
तावच्छेदकं तद्धर्म्मावच्छिन्नपर्याप्तिकावच्छेदकत्वं तन्निरूपकत्वोभयसंबंधेनावच्छे
दकताविशिष्टान्यप्रतियोगित्वमेव व्यापकतावच्छेदकत्वघटकत्ववाच्यं ॥ अतोवि
शिष्टधूमवत्त्वाभावमादायदोषसम्भवात् ॥ धूमत्ववह्नित्वयोरव्यापकतावच्छे
दकत्वसम्भवान्नकोपिदोषइत्याहुः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
श्रीविश्वेश्वरायनमः ॥ श्रीअन्नपूर्णादेव्यैनमः ॥ श्रीमहाकाल्यै नमः ॥ श्रीदुर्गादेव्यै
नमः ॥ श्रीराधाकृष्णाभ्यांनमः ॥ सहचारस्य जगदीश्युपरिकाउपत्रिका समाप्तिगम
मत् ॥ श्रीगौरीशङ्कराभ्यांनमः ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥
शके१७०८ प्रभवनाम संवत्सरे आश्विनकृष्णनवम्यां सौम्यवासरे सिद्धपुस्तकं स्व
हस्तेनकरसदाशिवशास्त्रिचंजस ॥ पत्राणि ॥१०॥ ग्रंथसंख्या २५५ ॥ श्रीः